ध्यान एवं प्रणाम-मन्त्र

चतुर्भुजी श्रीदुर्गा
अष्ट-भुजी श्रीदुर्गा
दश-भुजी श्रीदुर्गा
नव-दुर्गा
महा-काली
महा-लक्ष्मी
महा-सरस्वती

प्रकाशक
परा-वाणी आध्यात्मिक शोध-संस्थान
अलोपी-देवी मार्ग, प्रयाग-६

सिंहस्था शशि - शेखरा मरकत - प्रख्यैश्चतुर्भिर्भुजैः।
शङ्खं चक्र - धनुः - शराँश्च दधती नेत्रैस्त्रिभिः शोभिता ।।
आमुक्तांगद-हार-कङ्कण-रणत्-काञ्ची-क्वणन्-नूपुरा ।
दुर्गा दुर्गति-हारिणी भवतु नो रत्नोल्लसत्-कुण्डला ।।

।। श्री चतुर्भुजा-दुर्गायै नमः।।

विद्युद्-दाम-सम-प्रभां मृग-पति-स्कन्ध-स्थितां भीषणाम् ।
कन्याभिः करवाल-खेट-विलसद्-हस्ताभिरासेविताम् ।।
हस्तैश्चक्र-गदाऽसि-खेट-विशिखांश्चापं गुणं तर्जनीम् ।
विभ्राणामनलात्मिकां शशि-धरां दुर्गां त्रिनेत्रां भजे।।

।। श्री अष्ट-भुजा-दुर्गायै नमः ।।

कात्यायन्याः प्रवक्ष्यामि, मूर्तिं दश-भुजां तथा। त्रयाणामपि देवानामनुकारण-कारिणीम्॥
जटा-जूट - समायुक्तामर्धेन्दु - कृत - शेखराम्। लोचन - त्रय-संयुक्तां, पद्मेन्दु - सदृशाननाम्॥
अतसी-पुष्प-वर्णाभां, सुप्रतिष्ठां प्रलोचनाम्। नव-यौवन-सम्पन्नां, सर्वाभरण-भूषिताम्॥
सुचारु-दशनां तद्-वत्, पीनोन्नत-पयोधराम्। त्रिभङ्ग-स्थान-संस्थानां, महिषासुर-मर्दिनीम्॥
त्रिशूलं दक्षिणे दद्यात्, खड्गं चक्रं क्रमादधः। तीक्ष्ण-वाणं तथा शक्तिं, वामतोऽपि निबोधत॥
खेटकं पूर्ण - चापं च, पाशमंकुशमूर्ध्वतः। घण्टां वा परशुं वाऽपि, वामतः सन्निवेशयेत्॥
अधस्तान्महिषं तद्-वद्, वि-शिरस्कं प्रदर्शयेत्। शिरच्छेदोद्भवं तद्-वद्, दानवं खड्ग-पाणिनम्॥
हृदि शूलेन निर्भिन्नं, निर्यदन्त्र - विभूषितम्। रक्त-रक्ती - कृताङ्गश्च, रक्त - विस्फारितेक्षणम्॥
वेष्टितं नाग - पाशेन, भ्रुकुटी - भीषणाननम्। स-पाश-वाम-हस्तेन, धृत-केशं च दुर्गया॥

॥ श्री दश-भुजा-दुर्गायै नमः ॥

वन्दे वाञ्छित-लाभाय, चन्द्रार्ध-कृत-शेखरां ।
वृषारूढां शूल-धरां, शैल-पुत्रीं यशस्विनीम् ।।

।। श्री शैल-पुत्री-दुर्गायै नमः ।।



दधाना कर-पद्माभ्यामक्ष-माला-कमण्डलू ।
देवी प्रसीदतु मयि, ब्रह्म-चारिण्यनुत्तमा ।।

।। श्री ब्रह्म-चारिणी-दुर्गायै नमः ।।

पिण्डज-प्रवरारूढा, चण्ड-कोपास्त्रकैर्युता ।
प्रसादं तनुते मह्यं, चन्द्र-घण्टेति विश्रुता ।।

।। श्री चन्द्र-घण्टा-दुर्गायै नमः ।।

सुरा-सम्पूर्ण-कलशं, रुधिराप्लुतमेव च ।
दधाना हस्त-पद्माभ्यां, कूष्माण्डा शुभदाऽस्तु मे ।।

।। श्री कूष्माण्डा-दुर्गायै नमः ।।

सिंहासन-गता नित्यं, पद्माञ्चित-कर-द्वया ।
शुभदाऽस्तु सदा देवी, स्कन्द-माता यशस्विनी ।।

।। श्री स्कन्द-माता-दुर्गायै नमः ।।

चन्द्र-हासोज्ज्वल-करा, शार्दूल-वर-वाहना ।
कात्यायनी शुभं दयाद्, देवी दानव-घातिनी ।।

।। श्री कात्यायनी-दुर्गायै नमः ।।

एक-वेणी जपाकर्ण-पूरा नग्ना खरास्थिता।
लम्बोष्ठी कर्णिका-कर्णी, तैलाभ्यक्त-शरीरिणी ।।
वाम - पादोल्लसल्लोह - लता - कण्टक - भूषणा।
वर्धन्-मूर्ध-ध्वजा कृष्णा, काल-रात्रिर्भयङ्करी।।

।। श्री काल-रात्रि-दुर्गायै नमः ।।

श्वेते वृषे समारूढा, श्वेताम्बर-धरा शुचिः।
महा-गौरी शुभं दद्यान्, महा-देव-प्रमोददा ।।

।। श्री महा-गौरी-दुर्गायै नमः ।।

सिद्ध - गन्धर्व - यक्षाद्यैरसुरैरमरैरपि ।
सेव्य-माना सदा भूयात्, सिद्धिदा सिद्धि-दायिनी ।।

।। श्री सिद्धिदा-दुर्गायै नमः ।।

खड्गं चक्र-गदेषु-चाप-परिघान् छूलं भुशुण्डीं शिरः।
शङ्खं सन्दधतीं करैस्त्रि-नयनां सर्वाङ्ग - भूषावृताम् ।।
नीलाश्म-द्युतिमास्य-पाद-दशकां सेवे महा-कालिकाम् ।
यामस्तौत् स्वपिते हरौ कमलजो हन्तुं मधुं - कैटभम्।।

।। श्री महा-काल्यै नमः ।।

अक्ष-स्त्रक्-परशुं गदेषु-कुलिशं पद्मं धनुः कुण्डिकाम् ।
दण्डं शक्तिमसिं च चर्म-जलजं घण्टां सुरा-भाजनम् ।।
शूलं पाश-सुदर्शने च दधतीं हस्तैः प्रसन्नाननाम् ।
सेवे सैरिभ-मर्दिनीमिह महा-लक्ष्मीं सरोज-स्थिताम् ।।

।। श्री महा-लक्ष्म्यै नमः ।।

घण्टा-शूल-हलानि शङ्ख-मुसले चक्रं धनुः सायकम्।
हस्ताब्जैर्दधतीं घनान्त-विलसच्छीतांशु-तुल्य-प्रभाम् ।।
गौरी-देह-समुद्भवां त्रि-जगतामाधार-भूतां महा-
पूर्वामत्र सरस्वतीमनु-भजे शुम्भादि-दैत्यार्दिनीम् ।।

।। श्री महा-सरस्वत्यै नमः ।।